"अरुणोदं महाभद्रं असितोदं समानसम् । सरांस्ये-
तानि चत्वारि देवभोग्यानि सर्वदा" विष्णु पु० उक्ते-
स्तत्र महाभद्रं सरः । "सरांस्यथैतेष्वरुणञ्च मानसम्
महाह्रदं श्वेतजलं यथाक्रममिति" सि०शि० उक्ते स्तत्र
मानसं सरः । सरसां कल्पभेदान्नामभेदः । २तद्वासिनि
रामसैन्यस्थवानरभेदे च "गन्धमादनवासी च प्रथितो
गन्धमादनः । कोटीशतसहस्राणि हरीणां समकर्षत"
भा० व० २८७अ० । तत्पर्वतस्थे ३वनभेदे न० उदा-
हृतविष्णु पु० वाक्ये दृश्यम् ।

**गन्धमादनी** स्त्री गन्धेन माद्यतेऽनया मादि+करणे ल्युट्
ङीप् । १मदिरायां त्रिका० २वन्दाकौ ३चीड़ानामद्रव्ये
च राजनि० ।[१लाक्षायां २सुरानामगन्धद्रव्ये च राजनि०।

**गन्धमादिनी** स्त्री गन्धेन मादयति मादि—णिनि ङीप् ।

**गन्धमार्जार** पु० गन्धप्रधानः मार्जारः । खट्टासजन्तौ
जटाधरः । [णायां लतायाम् भावप्र० ।

**गन्धमालती** स्त्री गन्धेन मालतीव । गन्धकोकिलातुल्यगु-

**गन्धमालिनी** स्त्री गन्धमालाऽस्त्यस्या इनि ङीप् मल—
संश्लेषे णिनि वा इत० । १सुरानामगन्धद्रव्ये जटाधरः ।

**गन्धमुखा** स्त्री गन्धो मुखेऽस्याः । १कुकुन्दर्य्याम् (कुँचा) ।
शब्दार्थचि० । २आमोदिमुखवति त्रि० । स्त्रियां स्वाङ्गत्वात्
ङीप् । [अण् । (गन्धभादाल) लताभेदे वैद्यकम् ।

**गन्धमुण्ड** पु० गन्धं मुण्डयति मुण्ड+तत्करोति णिच—

**गन्धमूल** पु० गन्धप्रधानं मूलं यस्य । १कुलञ्जनवृक्षे २शल्लक्यां
३शट्याञ्च स्त्री टाप् राजनि० ।४शट्यां स्त्री अमरः जाति-
त्वात् ङीष् । वा कप् कापि अत इत्त्वम् । गन्धमूलिका
१माकन्द्यां २शट्याञ्च राजनि० । [राजनि० ।

**गन्धमूषिक** पुंस्त्री० गन्धप्रधानः मूषिकः । कुकुन्दर्य्याम्

**गन्धमूषी** स्त्री स्वल्पः मूषः मूषी गन्धप्रधाना मूषी । कुकु-
न्दर्य्यां हेमच० । [२खट्वासे च शब्दमा० ।

**गन्धमृग** पु० गन्धप्रधानो मृगः । १गन्धयोनौ कस्तूरीमृगे ।

**गन्धमैथुन** पु० गन्धेन गन्धघ्राणेन मैथुनं मैथुनारम्भो यस्य ।
वृषे जटाधरः । [राजनि० ।

**गन्धमोदन** पु० गन्धेन मोदयति मुद—णिच्—ल्यु । गन्धके

**गन्धमोहिनी** स्त्री गन्धेन मोहयति मुह—णिच—णिनि
ङीप् । चम्पककलिकायां राजनि० ।

**गन्धयुक्ति** स्त्री गन्धानां गन्धद्रव्याणां युक्तिर्योजनविशेषः।
वृ०सं० उक्ते गन्धद्रव्ययोजनप्रकारभेदे । गन्धयुक्तिश्च
सप्रयोजनभेदसहिता तत्र ७७अ०र्दर्शिता यथा

"स्रग्गन्धधूपाम्बरभूषणाद्यं न शोभते शुक्लशिरोरु-
हस्य । यस्मादतो मूर्धजरागसेवां कुर्यात्तथैवाञ्जनभूषणा-
नाम् । लौहे पात्रे तण्डुलान् कोद्रवाणां शुक्ते
पक्त्वाँल्लोहचूर्णेन साकम् । पिष्टान् सूक्ष्मं मूर्ध्नि शुक्ला-
म्लकेशे दत्त्वा तिष्ठेद्वेष्टयित्वार्कपत्रैः । याते द्वितीये प्र-
हरे विहाय दद्याच्छिरस्यामलकप्रलेपम् । सञ्छाद्य पत्रैः
प्रहरद्वयेन प्रक्षालितं कार्ष्ण्यमुपैति शीर्षम् । पश्चा-
च्छिरःस्नानसुगन्धितैलैर्लौहाम्लगन्धं शिरसोऽपनीय ।
हृद्यैश्च गन्धैर्विविधैश्च धूपैरन्तःपुरे राजसुखं निषेवेत् ।
त्वक्कुष्ठरेणुनलिकास्पृक्कारसतगरबालकैस्तुल्यैः । केसर-
पत्रविमिश्रैर्नरपतियोग्यं शिरःस्नानम् । मञ्जिष्ठया
व्याघ्रनखेन शुक्त्या त्वचा सकुष्ठेन रसेन चूर्णः । तैलेन
युक्तोऽर्कमयूखतप्तः करोति तच्चम्पकगन्धि तैलम् ।
तुल्यैः पत्रतुरुष्कबालतगरैर्गन्धः स्मरोद्दीपनः सव्यामो
बकुलोऽयमेव कटुकाहिङ्गुप्रधूपान्वितः । कुष्ठेनोत्पलग-
न्धिकः समलयोमधुर्वा भवेच्चम्पको जातीत्वक्सहितोऽति-
मुक्तकइति ज्ञेयः स कुस्तुम्बुरुः । शतपुष्पाकुन्दुरुकौ पा-
देनार्धेन नखतुरुष्कौ च । मलयप्रियङ्गुभागौ गन्धोधूप्यो
गुडनखेन । गुग्गुलुबालकलाक्षामुस्तानखशर्कराः क्रमा-
द्धूपः । अन्यो मांसीबालकतुरुष्कनखचन्दनैः पिण्डः ।
हरीतकीशङ्खघनद्रवाम्बुभिर्गुडोत्पलैः शैलकमुस्तकान्वितैः ।
नवान्तपादादिविवर्धितैः क्रमाद् भवन्ति धूपा बहवो म-
नोहराः । भागैश्चतुर्भिः सितशैलमुस्ताः श्रीसर्जभागौ
नखगुग्गुलू च । कर्पूरबोधो मधुपिण्डितोऽयं कोप-
च्छदो नाम नरेन्द्रधूपः । त्वगुशीरपत्रभागैः सूक्ष्मैलार्धेन
संयुतैश्चूर्णः । पटवासः प्रवरोऽर्कं मृगकर्पूरप्रबोधेन ।
घनबालकशैलेयककर्पूरोशीरनागपुष्पाणि । व्याघ्रनखस्पृ-
क्कागुरुदमनकनखतगरधान्यानि । कर्पूरचोरमलयैः
स्वेच्छापरिवर्तितैश्चतुर्भिरतः । एकद्वित्रिचतुर्भिर्भागैर्गन्धा-
र्णवो भवति । अत्युल्बणगन्धत्वाद् एकांशो नित्यमेव
धान्यानाम् । कर्पूरस्य तदूनो नैतौ द्वित्र्यादिभिर्देयौ ।
श्रीसर्जगुडनखैस्ते धूपयितव्याः क्रमाच्च पिण्डस्थैः ।
बोधः कस्तूरिकया देयः कर्पूरसंयुतया । अत्र सहस्र-
चतुष्टयमन्यानि च सप्ततिसहस्राणि । लक्षं शतानि सप्त
विंशतियुक्तानि गन्धानाम् । एकैकमेकभागं द्वित्रिचतुर्भा-
गिकैर्युतं द्रव्यैः । षड्गन्धकरं तद्वद् द्वित्रिचतुर्भागिकं
कुरुते । द्रव्यचतुष्टययोगाद् गन्धचतुर्विंशतिर्यथैकस्य ।
एवं शेषाणामपि षण्णवतिः सर्वपिण्डोऽत्र । षोडशके